# ॥ कामख्या ध्यानम् ॥

रविशशियुतकर्णा कुकंउमापीतवर्णा,
मणिकनकविचित्रा लोलजिन्ह्वा त्रिनेत्रा ।
अभयवरदहस्ता साक्षसूत्रप्रहस्ता,
प्रणतसुरनरेशा सिद्धकामेश्वरी सा ॥
अरूण-कमलसंस्था रक्तपद्मासनस्था,
नवतरूणशरीरा मुक्तकेशी सुहारा ।
शवहृदिपृथुतूङ्गा स्वाङ्घियुग्मा मनोज्ञा,
शिशुरविसमवस्त्रा सर्वकामेश्वरी सा ॥
विपुलविभवदात्री स्मेरवस्त्रा सुकेशी,
दलितकरकदन्ता सामिचंद्रावनन्मा ।
मनसिज-दृशदिस्था योनिमुद्रालसन्ती,
पवनगगनसक्त संश्रुतस्थानभाग ॥
चिंत्था चैवं दीप्यदग्निप्रकाशा,
धर्मार्थाद्यैः साधकेर्वाछ्ंितार्थः ॥

कामाख्या स्त्रोतम्

जय कामेशि चामुण्डे जय भूतापहारिणि ।
जन सर्वगते देवि कामेश्वरे नमोऽस्तुते ॥
विश्वमूर्त्ते शुभे शुद्धे विरूपाक्षि त्रिलोचने ।
भीमरूपे शिवे विद्ये कामेश्वरि नमोऽस्तुते ॥
मालाजये जये जम्भे भृताक्षि क्षुभितऽक्षये ।
महामाये महेशानि कामेश्वरि नमोऽस्तुते ॥
भीमाक्षि भीषणे देवी सव्वर्भूत भयङ्करि ।
करालि विकरालि च कामेश्वरि नमोऽस्तुते ॥
कालि करालविक्रान्ते कामेश्वरि हरप्रिये ।
सर्व्वशमहासारभूते कामेश्वरि नमोऽस्तुते ॥
माकरूप-प्रीपे च नीलकूट-निवासिनि ।
निशुम्भ-शुम्भ मथनि कामेश्वरि नमोऽस्तुते ॥
कामाख्ये कामरूपस्थे कामेश्वरि हरप्रिये ।
कामनां देहि नित्यं कामेश्वरि नमोऽस्तुते ॥
रूधिरासवपानाढ्यवकत्रे त्रिभुवनेश्वरी ।
महिषासुरवधे देवी कामेश्वरि नमोऽस्तुते ॥
छागतुष्टे महाभीमे कामाख्ये सुवन्दिते ।

जय कामप्रदे तुष्टे कामेश्वरि नमोऽस्तुते ॥
भ्रष्टराज्यो यदा राजा नवम्यां नियतः शुचि ।
अष्टाम्यञ्च चतुर्दश्यामुपवासी नरोत्तमः ॥
संवत्सरेण लभते राज्यं निष्कंटकं पुनः ।
य इदंश्रृणुयाद् भक्तया तव देवि समुद्भवम् ॥
सर्वपापविमिर्म्मक्तः परं निर्वाणमृच्छति ।
श्रीकामरूपेश्वरि भास्करप्रभे प्रकाशिताम्भोजनिभायतानने ।
सुरारि-रक्षःस्तुतिपातनोत्सुके, त्रयीमये देवनुते नमामि ॥
सितासिते रक्तपिशाङ्गविग्रहे, रूपाणि यस्याः प्रतिभांति तानि ।
विकाररूपा च विकल्पितानि शुभशुभानमपि तां नमामि ॥
कामरूपसमुद्भूते कामपीठावतंसके ।
विश्वाधारे महामाये कामेश्वरि नमोऽस्तुते ॥
अव्यक्त विग्रहे शान्ते सन्तते कामरूपिणि ।
कालगम्ये परे शान्ते कामेश्वरि नमोऽस्तुते ॥
या सुपुन्मन्तरालस्था चिन्त्यतेज्योतिरूपिणि ।
प्रणतोऽस्मि परां धीरां कामेश्वरि नमोऽस्तुते ॥
दंष्ट्रकरालवदने मुण्डमालोपशोभिते ।
सर्व्वतः सर्व्वगे देवि कामेश्वरि नमोऽस्तुते ॥
चामुण्डे च महाकालि कालि कपोलहारिणी ।
पाशहस्ते दण्डहस्ते कामेश्वरि नमोऽस्तुते ॥
चामुण्डे कुलमालास्ये तीक्ष्णदंष्ट्र महावले ।
शवयानास्थिते देवि कामेश्वरि नमोऽस्तुते ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

---

Please send corrections to sanskrit@cheerful.com
Last updated November 22, 2001